International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 61-63
© 2026 IJMH
www.themultijournal.com
Received: 27-04-2026
Accepted: 22-05-2026
Publish : 23-05-2026

**राहुलकुमारः**
शोधच्छात्रः,
ज्योतिषविभागः(वेदवेदाङ्गसङ्कायः)
श्रीलालबहादुरशास्त्री केन्द्रीयसंस्कृतविश्व-विद्यालयः,नवदेहली-११००१६

**मार्गनिर्देशकः**
**प्रो. परमानन्दभारद्वाजः**
वरिष्ठाचार्यः,
ज्योतिषविभागः(वेदवेदाङ्गसङ्कायः)
श्रीलालबहादुरशास्त्री केन्द्रीयसंस्कृतविश्व-विद्यालयः,नवदेहली-११००१६

**Correspondence:**
**राहुलकुमारः**
शोधच्छात्रः,
ज्योतिषविभागः(वेदवेदाङ्गसङ्कायः)
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविश्व-विद्यालयः,नवदेहली-११००१६

# घाघभड्डुरी-उक्तिषु शकुनविचारः

**राहुलकुमारः, प्रो. परमानन्दभारद्वाजः**

**शोधसारांशः**

घाघः भड्डुरी च भारतीयलोकपरम्परायां सुप्रसिद्धौ कृषक– कवी, ज्योतिषज्ञानसम्पन्नश्च मन्येते। अनयोः नाम्ना प्रचलितानि घाघवाक्यानि भड्डुरीवाक्यानि च न केवलं कृषिसम्बद्धानि, अपि तु कालज्ञानं, नक्षत्रग्रहविचारः, ऋतुचिन्तनं, तथा विविधेषु शकुनेषु आधारितं व्यवहारज्ञानं च प्रकाशयन्ति। एतेषु वाक्येषु शकुनचिन्तनं विशेषं स्थानं बिभर्ति। शकुनं नाम प्रकृतौ दृश्यमानानां घटनानां, पक्षिणां, पशूनां, निसर्गलक्षणानां वा तादृशः संकेतः, येन भाविकार्यस्य शुभाशुभनिर्णयः क्रियते। भारतीयपरम्परायां शकुनचिन्तनं दीर्घकालीनानुभवजन्यं ज्ञानरूपं स्वीक्रियते। घाघभड्डुर्य्याम् एषः अनुभवः लोकजीवनस्य प्रत्यक्षावलोकनाद् उद्भूतः। घाघभड्डुर्य्याः शकुनचिन्तनं विशेषतः कृषिकर्मणि प्रवृत्तम्। वर्षा, अनावृष्टिः, सुभिक्षं, दुर्भिक्षं, बीजारोपणकालः, कृषिपरिणामः एते सर्वे विषयाः शकुनैः सूचिताः भवन्ति। उदाहरणतया— पक्षिणां कूजनं, उड्डयनदिशा, निवासस्थानं च वर्षायाः संकेतं ददाति। पशूनां व्यवहारः— गवां शृङ्गप्रहारः, अश्वानां चेष्टा वातवर्षादीनां पूर्वसूचना मन्यते। मेघानां वर्णः, आकारः, गतिः च निकटभविष्यत्कालस्य जलवृष्टेः प्रमाणं स्वीक्रियते। एतेषु सर्वेषु घाघभड्डुर्य्यां दृष्टिकोणः व्यावहारिकः अस्ति—“ **अत्र यत् दीर्घकाले दृष्टं, तत् नियमत्वेन स्वीक्रियते**”।

घाघभड्डुर्य्याः शकुनचिन्तनं ग्राम्यसमाजे निर्णयप्रक्रियायाः आधारः आसीत्। कृषकः बीजारोपणं कुर्वन्, व्यापारी यात्राम् आरभमाणः, गृहस्थो विवाहादिकं चिन्तयन्— सर्वे शकुनसंकेतैः प्रेरिताः आसन्। अतः शकुनचिन्तनं केवलं ज्योतिषीयं न, अपि तु सामाजिकव्यवहारस्य नियामकं तत्त्वम् अस्ति। यद्यपि आधुनिकदृष्ट्या कानिचन शकुनानि अवैज्ञानिकानि दृश्यन्ते, तथापि घाघभड्डुर्य्यां शकुनचिन्तनम् अनुभवजन्यं, सांख्यिकीयं (लोकानुभवाधारितं) मन्यते। दीर्घकालनिरीक्षणात् यदा कश्चन संकेतः पुनःपुनः फलदायकः दृश्यते, तदा सः लोकनियमत्वेन प्रतिष्ठितः भवति।घाघभड्डुर्य्यां शकुनचिन्तनं भारतीयलोकबुद्धेः सजीवोदाहरणम् अस्ति। अत्र शकुनं न केवलं दैवसंकेतः, अपि तु प्रकृत्या सह मानवस्य संवादः। अनुभवः, निरीक्षणं, तथा व्यवहारज्ञानम्—एतेषां समन्वयेन घाघभड्डुर्य्याः शकुनचिन्तनं लोकजीवनस्य मार्गदर्शकरूपं धारयति। आधुनिकयुगेऽपि अस्य अध्ययनं सांस्कृतिकदृष्ट्या, लोकज्ञानदृष्ट्या, तथा इतिहासदृष्ट्या अत्यन्तम् उपयोगी इत्यत्र नास्ति संशीतिसन्ततिः।

**प्रस्तौतिः**

अस्मिन् शोधे घाघभड्डुरी इत्यस्य ग्रन्थस्य वाक्येषु निहितं शकुनचिन्तनं विश्लेष्यते। घाघभड्डुर्य्याः शकुनविचारः भारतीयलोकपरम्परायां अनुभवजन्यज्ञानस्य प्रतिनिधिः दृश्यते, यत्र प्रकृतिलक्षणैः—पक्षिपशुचेष्टाभिः, मेघवर्णगत्यादिभिः, ऋतुचिह्नैश्च—भाविफलनिर्णयः क्रियते। एष शकुनविचारः विशेषतः कृषिजीवनकेन्द्रितः विद्यते, यत्र वर्षा, अनावृष्टिः– सुभिक्ष– दुर्भिक्षादीनां पूर्वानुमानं व्यवहारबुद्ध्या सह सम्बद्धम् अस्ति। शोधेऽस्मिन् प्रतिपाद्यते यत् घाघभड्डुर्य्याः शकुनचिन्तनं न केवलम् अन्धविश्वासात्मकं, अपि तु दैर्घ्यकालिकलोकानुभवाधारितं, सांस्कृतिक– पर्यावरणीयज्ञानसमन्वितं च अस्ति। ग्राम्यसमाजे एतत् शकुनज्ञानं निर्णयप्रक्रियायाः (कृषिकर्म, यात्रा, कालचयनम्) आधाररूपेण कार्यं कृतवन्। अतः घाघभड्डुर्य्यां शकुनचिन्तनं भारतीयलोकबुद्धेः, पारम्परिकज्ञानव्यवस्थायाश्च महत्त्वपूर्णं आयामं प्रकाशयति—इति अस्य शोधस्य मुख्यनिष्कर्षः।

**घाघस्य परिचयः**

घाघः कृषिपण्डितोऽवर्तत । अथास्य नाम भारतवर्षस्य उत्तरस्यां दिशि कृषकाणां रसनाग्रे भवति। गोः क्रयणं बीजवपनम् आदिषु कर्मसु घाघस्योक्तयः सार्थक्यः अनुभूयन्ते जनैः। घाघस्योक्तयः समग्रेऽपि भारते सर्वजनमनः पुष्टकारिण्यः वर्तन्ते। घाघस्य जन्मकालसन्दर्भे जन्मस्थानसन्दर्भे च विदुषां मतवैविध्यं दरीदृश्यते। सिंहसरोजस्य मते घाघस्य जनिः 1753 तमे ईसवीये वर्षेऽभवत्। रामनरेशत्रिपाठिवर्याणां मते घाघस्य जनुः अकबरस्य समयेऽभूत्। विदुषां वचनेनज्ञायते यदमुष्य घाघस्य जनिः बिहारः प्रदेशेऽवर्तत ततः असौ घाघः कन्नौजनगरमुवास। जनश्रुतिभिर्ज्ञायते यदस्य कान्तायाः पितुर्गृहं कन्नौजेऽवर्तत। घाघस्य समग्रं नाम देवकली दुबे आसीत् अथास्य पुत्रौ द्वावास्ताम्। द्वावपि पुत्रौ कन्नौजनगरस्य चौधरीसरायाख्ये स्थानेऽवसताम्। घाघस्य वैलक्षण्यं वैदुष्यं विलोक्य अकबरः विस्मितः सन् घाघाय प्रचुरतरं धनं भूमिञ्च प्रददौ। अनेन ग्राम स्थापितः यस्य नाम अकबराबादसरायघाघ वर्तते। यो ग्रामः साम्प्रत् कन्नौजनगरात् दक्षिणस्यां दिशि वर्तते। अद्यावधिः घाघविरचितं किञ्चिदपि पुस्तकं न प्राप्तमस्ति। घाघस्योक्तयः व्यस्ताः सन्ति। रामनरेशत्रिपाठीवर्येण घाघस्योक्तीनाम् एकत्रीकरणं विहितं तथा च 1931 तमे ईसवीये वर्षे घाघ और भड्डरी इति सङ्क-लानात्मकं पुस्तकं व्यरचि। घाघस्य कृषिविज्ञानम् अपरिमितम-प्रयेमश्चासीत्। घाघः ज्योतिर्विदासीत् ज्योतिषस्य विषयान् आधारीकृत्य शुभाशुभयोः फलादेशमसौ घाघः चकार।

**भड्डर्याः परिचयः-**

भड्डरी हिन्द्याः लोककविषु प्रथितयशस्को राजते। घाघस्य इवामुष्य भड्डर्या जीवनवृत्तमिदमपि विदुषा मतवैविध्याय कल्प्यते। भड्डर्या जनेः विषये ग्रामीणक्षेत्रेषु श्रुतयः प्रचलिताः सन्ति। श्रुतिभिः ज्ञायते यदसौ काश्यामेको ज्योतिषी उवास। अनेन एकस्यां वेलायां ज्योतिषगणनया प्राप्तं,एवम्प्रकारकः क्षणः समायातः यस्मिन् गर्भधानेन महान् विद्वान् यशस्वी च सुतः भविष्यति। इदं चिन्तनमादृत्यासौ विद्वान् पितुर्गृहं सम्प्राप्तः। काशीतः भड्डर्या गृहं बहुदूरेऽवर्तिष्ट।मार्गे एव यदुकुलगृहं सम्प्राप्तः। भोजनावसरे प्राप्तः युवत्या कन्यया खिन्नमनस्कोऽयम्आसीत्। सत्यामेतादृश्यां स्थितौ कन्यया सम्पृष्टोऽसौ ज्योतिषी कारणं किमिति। ज्योतिषी बहु विचिन्त्य दृढीभूय स्ववार्तामस्थापयत्। वार्तामिमां श्रुत्वा युवत्या मनसि पुत्रेप्सा जागृता द्वयोरिच्छया भड्डरी जन्मालभत। वीरान मेहता महोदयस्य मते वराहमिहिरः तीर्थयात्रायामासीत् ग्रहगणि-तज्ञेन मिहिरेण ज्ञातमद्य शुभदिवसः वर्तते गर्भाधानेन पण्डितं सुतं लभिष्ये, एतद्विचिन्त्य परिभ्रमन् इतरजातिकन्यया साकं विवाहमकरोत् तस्याः कन्यायाः एकः पुत्र अभवत् यः जन्मना ज्योतिषी अभूत्। यतो हि मतमिदं तर्कयुक्तं न बिभाति। उभयोः ज्ञानमप्रमेयमासीत्। अनयोः शुभशुभयोर्ज्ञानमद्वितीयं ज्योतिषशास्त्र-सम्बद्धं चासीत्। कृषिविज्ञानस्य यथायथं ज्ञानं तथा लाभहानी उभयोर्वैशिष्ट्यमासीत्।

**घाघभड्डरीग्रन्थे शकुनविचारः**

अस्मिन् ग्रन्थे लोकोक्तिमाध्यमेन ग्रन्थकृता अनेकेषां शकुनानां चर्चा व्यधायि।तद्यथा-

यदि आरात्रि भीगुरपक्षी ध्वनिं कुर्यात् गोहः उच्चस्वरेण शब्दं कुर्यात् मयूरो वा ध्वनिं कुर्यात् तदा वृष्टिः भवति। वस्तुतः अनेके पक्षिणः पशवः सन्ति जगतीतले तेषु केचन शुभलक्षणं प्रदिशन्ति केचन अशुभं लक्षणं प्रदिशन्ति प्रकृतस्थले भीगुरपक्षी शिखी गोहः एते त्रयाः वृष्टिकार्याय निमित्तीभूताः यतः एतेषां ध्वनिः वृष्टिकार्यस्य सूचको वर्तते। कृषिकार्यञ्च इदं समग्रम् अपि वृष्ट्याधीनं वर्तते। यथाह ग्रन्थकारः-

**बिंभलियाँ बोलै रात निमाईछाली बाडाँ बेस छिकाई।**
**गोहाँ राग करे गरणाठजोरा मेह मोरा अजगाई।।**[1]

यदि पपीहा परितः पी-पी कुर्वन् कैरवृक्षस्य शाखायां व्रजेत् कैरवृक्षः जगतीतले अनेकुषु स्थानेषु दृश्यते। पमीहा पक्षी च यत्र तत्र विचरन् दृश्यते एव अस्माभिः परं यदा पपीहा पक्षी ध्वनि. कुर्यात् तदा वृष्टेः सम्भावना भवति।अथ च सूर्योदये उष्णः सूर्यः चेद् वर्षा भविष्यति। सूर्योदयकाले प्रायेण सर्वैरेव शीतस्य सूर्यस्य अनुभवः क्रियते, परं यदि कदाचित् उष्णत्वस्य अनुभूतिः भवेत् तदा अपि वृष्टेः सम्भावना भवति। इत्येवम्प्रकारेण प्रकृतेस्थले वृष्टेः निर्दिष्टं विद्यते।

**भल भल बके पपइयों बाणी, कूँपल कैर तणी कमलवाणी।**
**जलहल तो ऊगे रवि जाणी, पहराँ माँय अवसरे पाणी।।**[2]

यदि सरोवरस्य जलमुष्णं स्यात् रजतस्य स्थालिका नीला स्यात् पनडुब्बी वृक्षे स्थित्वा शब्दं कुर्यात् चेत् उत्तरदेशात् कृष्णं घटमायाति इति पद्यस्यार्थो भवति। आचार्येण प्रकृतस्थले कस्या दिशः मेघानाम् आगमनं भविष्यति इत्यस्य अपि लक्षणं प्रस्तुतं विद्यते। ग्रन्थकारस्य मते जलाशयाः ये विद्यन्ते तत्र जलस्य स्वभावे उष्णता अस्माभिः अनुभूयते अथ च रजतस्य स्थाल्यां नीलवर्णो दृश्यते चेत् उत्तरदिशातः मेघस्य आगमनं भवतीति। इदमेव आचार्यस्य वैशिष्ट्यं वर्तते यदेते आचार्याः मेघस्य आगमनरूपं सूक्ष्मतिसूक्ष्ममपि लक्षणं जानन्ति स्म।

**नाड़ी जलह्वै तातो न्हाली, थिर करवै नीलौ रङ्गथाली।।**
**चहके बैठ सिरे चूँचली, काँठले बैधे उत्तरदिस काली।।**[3]

यदि हरितानि तृणानि ज्वलितानि, मार्जारायुद्ध्यन्ति, रात्रिका-लस्य मेघः प्रातः कालं यावत् स्यात् तदा वृष्टिः भविष्यति इति पद्यस्य अर्थो विद्यते। हरितानां तृणानां ज्वलनं प्रायेण न सम्भवति परमेतेषां ज्वलनं दृश्यते, बिदालाः यदि परस्परं युद्ध्यन्तः दृश्यन्ते, यतः बिडालानामेकत्र सङ्ख्या अधिकान दृश्यते यदि दृश्यते चेत् तदा वृष्टिः भवति इति आचार्याणां मतं वर्तते एतदतिञ्च अपि रात्रौ मेघाः ये द्वाराः ते एव मेधा यदि प्रातः दृश्यन्ते चेत् तदापि वृष्टिर्भवतीति ग्रन्थकारास्य मतं वर्तते। एतत् लक्षणत्रयं वृष्टेः आचार्येण निर्दिष्टम्

**जिण दिन नीली वले जवासी, माँडे राड साँपरी मासी।**
**बादल रहे रातरा वासी, तो जाणो चैकस मेह आसी।।**[4]

यदि गृहगोदिका वृक्षस्थीभूय लोहितवर्णं धारयति तथा वायुः उत्तरं वहति तदा वृष्टिः भविष्यति। गृहगोदिका पक्षिविशेषो वर्तते यदि पक्षी अयं वृक्षे तिष्ठति चेत् यतः अस्य पक्षिणः स्वभावः पृथ्व्यां चरण विद्यते, वृक्षे अयं दृश्यते चेत् अनेन साकं, यदि पवनमुत्तरस्यां दिशि प्रवहति यतः अस्य वायोः उत्तरा दिशा न स्वभावतः अतः अत्र लक्षणद्वयम् आचार्येण निर्दिष्टं येन वृष्टेः लक्षणं ज्ञातुं शक्यते।

**बिरछाँ चढ़े किरकाँट विराजे, स्याह हफेतं लाल रङ्ग साजे।।**
**बिजनस पवन सूरियो बाजे, घड़ी पलक माँहे मेह गाजे।।**[5]

यदि श्वेतः सर्पः वृक्षशिखरस्थः मेघः, पश्चिमं व्रजेत्, सारसानां युगलम् आकाशे चेत् नदीनां जलमतिवेगेन गमिष्यति। ग्रन्थकारस्य आशयो विद्यते वृक्षस्य शिखरभागे यदि श्वेतः कश्चित् सर्पो दृश्येत अनेन साकं मेघः पश्चिमस्यां दिशि गमनशीलः दृश्येत् तदा जले वेगः वर्धते। भवतीति आचार्याणां मतं वर्तते। पूर्वोक्तलक्षणाभ्यां साकं यदि सारसपक्षिणां समूहः सारूपक्षिद्वयं वा आकाशे उड्डीयमाना दृश्यन्ते चेत् तदापि जलस्य वेगः वर्धते इति ग्रन्थकास्य मतं वर्तते।

**ऊंचो नाग चढै तर ओडे, दिस पिछमाँण बादला दौडे।।**
**सारस चढ असमान सजोड़े, तो नदियाँ ठाहा जल तोड़े।।**[6]

यदि ग्रीष्मं घृतं वहेत्, कीटकाः स्वण्डं बहिःकारयेयु एवं कीटकाः सिकतासु वृद्धिं गच्छेयुः तदा वृष्टिः भविष्यति येन गृहमेव पूर्यते। अत्यधिकं वृष्टिः कदा भवति इत्यस्य लक्षमपि आचार्येण प्रस्तुतं वर्तते। आचार्यस्य मते यदि उष्णकारणेत् स्वयमेव प्रवत् स्यात्, कृमिकीरादयः उष्णकारणे स्वस्य अण्डानि बहिः प्रक्षिपेयुः, अथ च कृमिकीटादिषु वृद्धिः स्यात्तदापि वृष्टिः भवति परम् इयं वृष्टिः गृहस्य अन्तः पुरे यावत् आगमिष्यति।

**ऊमस कर घृतमाठ जमावै, ईडा कीड़ी बाहर लावै।।**
**नीर बिना चिड़िया रज न्हावै, मेह बरसे घर माँ न माव।।**[7]

दिवसे मेघः स्यात् रात्रौ न स्यात् तथा पूर्वदिशा स्थायं स्थायं वायु प्रवहेच्चेत् कश्चिदनर्थः स्यात् रजकः कूपजलात् वसनं प्रक्षालयति दिवाकाले प्रायेण मेघा न दृश्यन्ते रात्रौ मेघानां दर्शनं भवतीति वस्तुस्थितिः परं यदि मेघानां दर्शनं स्यात् पूर्वस्यां दिशि वायुः विरम्य प्रवहेत् अछ च यदि रजकः कूपस्य जलं निःसार्थ वस्त्रं प्रक्षालयति तदा अरिष्टस्य शङ्का कर्तव्या। एते त्रयोऽपि योगः अरिष्टस्य सूचकाः इति ग्रन्थकारस्य मतं वर्तते।

**दिन का बदर रात निबदर, बहे पुरवैया भब्बर भब्बर।।**
**घघ कहैं कुछ होनी होई, कुवाके पानी धोवी धोदि।।**[8]

आषाढशुक्ले यदि बुधस्य उदयः तथा शुक्रस्य अस्तः स्यादुभौ महाकालकारकौ स्तः। ग्रन्थकारस्य आशयो वर्तते आषाढमासस्य शुक्लपक्षे यदि बुधग्रहस्य उदयः तथा च शुक्रग्रहस्य अस्तः स्यात्तदा एतौ द्वावपि योगौ महतः अनिष्टस्य सूचकौ वर्तते। अतः सत्यामेता-दृश्यामवस्थायां सावधानेन भाव्यम् अस्माभिः।

**सुदि आषाढ मे बुध को, उदै भयो जो देख।**
**शुक्र अस्त सावन लखो, महाकाल अवरेख।**[9]

यदि मङ्गलः अग्रतः स्यात् पृष्ठतश्च सूर्यश्चेत् वृष्टिर्न्यूना भविष्यति। यदि सूर्योदयसमये इन्द्रधनुषः दृश्यते चेत् तस्मात् दिनात् पञ्चमदिवसे भूम्यां रूण्डमुण्डो दृश्यते। भौमग्रहस्य अग्रतः गमनं, अस्य भौमस्य पृष्ठानुगमं सूर्यग्रहस्य वृष्टिं तु सूचयति परं वृष्टिः न्यूनतया भवतीति ग्रन्थकारस्य आशयो विद्यते। एवमेव सूर्यस्य उदयनकाले यदि गगनतले सप्तवर्णात्मकः इन्द्रधनुषः दृश्यते चेद् यस्मिन् दिने इन्द्रधनुषः दृष्टः तस्मात् दिनात् पञ्चमं मृतस्य मनुष्यस्य मुण्डो दृश्यते। आशयो भवति सूर्योदयसमये इन्द्रधनुषस्य दर्शनमशुभं भवतीति।

**सूर उगे पच्छिम दिसा, धनुष उगन्तो जान।**
**दिवस जो चैथे पाँचवे रूडमुड महि जान।।**[10]

यस्मिन् दिने सूर्यस्य संक्रान्तिः स्यात् तस्य चतुर्थे दिवसे अशुभस्यापि शुभो भवति। आचार्येण ग्रन्थकारेण निर्दिष्टं सूर्यग्रहस्य सङ्क्रान्तिः यस्मिन् दिने भवेत् ततः चतुर्थे दिने यदि किमपि अशुभं विधिना। ललाटे लिखितं तस्यत्तदपि शुभं भवति। इत्येवम्प्रकारेण शुभलक्षणम् इदं भवतीति ज्ञातुं शक्यते।

**जिन बाराँ रबि संक्रमै, तिनै अमावस होय।**
**अशुभ परन्ती शुभ करै, जोति जोतिस सार।।**[11]

भरण्यां विशाखायां कृत्तिकायां आर्द्रायां मघायां मूले नक्षत्रे च यदि श्वानः कश्चित् घातयेत् चेत् अत्यधिको भङ्करो भविष्यति। ग्रन्थकारस्य आशयो वर्तते यदि भरणीनक्षत्रे यस्मिन् समये भरणीनक्षत्रं स्यात्तास्मिन् समये अथवा विशाखानक्षत्रे मूलनक्षत्रे कुक्कुरं यदि कश्चित्, प्रताड्येत, घातयेत् तदा अशुभ लक्षणम् इदं भवति। पञ्चनक्षत्रेषु कुक्कुरः अतादनीय। इत्यपि लक्षणेन अनेन ज्ञायते।

**भरणि विशाखा कृत्तिका, आरद्रा मघ मूल।**
**इन मे काटै कुकुरा, भड्डुर है प्रतिकूल।।**[12]

यदि मेघः शुक्रवासरे स्यात् एवं शनिवासरं यावत् तिष्ठेत् चेत् सः मेघः वर्षां कृत्वा एव गमिष्यति। ग्रन्थकारस्य आशयो वर्तते एक एव मेघः यदि भृग्रवासरे मन्दवासरे वा उभयोः वासरयोः समानतया दृश्यते चेत् अयं मेघः वृष्टिं करोति। इत्येवम्प्रकारेण दिनद्वयमेकस्यैव मेघस्य दर्शनं वृष्टिसूचकम् इति ग्रन्थकारस्य मतं वर्तते।

**सुक्रवार की बादरी, रहै सनीचर छाय।**
**ऐसा बोलैं भड्डुरी, बिन बरसे नहि जाय।।**[13]

भाद्रपदमासस्य स्वातिपञ्चम्यां जनाः आनन्दिताः भवन्ति। भाद्रप-दनाम्रा एकः मासः प्रसिद्धो वर्तते मासेऽस्मिन् स्वातिनक्षत्रं यदि आयाति पञ्चभ्यां तिथौ तदा सर्वेषां मनः प्रसन्नं भवति। आशयो विद्यते इदं भाद्रपदमासस्य पञ्चभ्याः तिथेः स्वातिनक्षत्रम् अत्यन्तं शुभकरं भवतीति आचार्याणां मतम्।

**भादों कि सुदि पञ्चमी, स्वाति संजोगी होय**
**दोनों शुभ जोगै मिलै, मङ्गल बिरती लोप।।**[14]

यदि मूले नक्षत्रे तथा रोहिण्यां नक्षत्रे च मेघः स्यात् तथा आर्द्रायां च वायुः प्रवहेच्चेत् कृषिकार्ये न कोऽपि लाभो भवति। कृषिकर्मणि कदा लाभः कदा च हानिः भवतीति यदि कृषकः कृषिकार्यं विदधाति तदा सः कृषिकार्येण अधिकं धनं लभते तथा च प्रसन्नो भवति। अतः कृषकेण मूले नक्षत्रे यदि मेघः दृश्यते रोहिणीनक्षत्रे च यदि मेघः दृश्यते नक्षत्रद्वये मेघस्य दर्शने, आद्रानक्षत्रे वायोः प्रवाहः दृश्यते चेत्तदापि कृषिकार्यस्य आरम्भः न कर्तव्यः। यतः कृषिकार्ये हानिर्भविष्यति।

**मूल्यो गलयो रोहिनी गली, अद्रा बाजी वाय**
**हाली बेंचो बधिया, खेती लाभ नसाय।।**[15]

**उपसंहारः**

hअद्यापि कृषिविचारावसरे एता उक्तयः लौकिकव्यवहारे लोकैः समाद्रियन्ते। घाघभड्डुर्याः कृषिसम्बद्धज्योतिर्विज्ञानं कृषकार्ये लाभप्रदं वर्वर्ति। घाघभड्डुर्याः युक्तयः यथावदद्यापि प्रभावपूर्णाः वर्तन्ते। कृषिकार्यं कथं कुत्र केनप्रकारेणेति समग्राणां कृषिविज्ञानसम्बद्धानां विषयाणां ज्ञानम् अथ चैतेषां शुभाशुभफलज्ञानं घाघभड्डुर्याः अध्ययनेन भविष्यति। एवम्प्रकारेण शुभशकुनानाम् अशुभशकुतानां वा कृषिकार्ये तदितरेषु विषयेषु ज्ञानं घाघभड्डुर्याः कर्तुं शक्यन्ते।

**पाद टिप्पणी -**

1. घाघभड्डुरी पृ. 192 उक्तिः 14
2. घाघभड्डुरी पृ. 193 उक्तिः 15
3. घाघभड्डुरी पृ. 193 उक्तिः16
4. घाघभड्डुरी पृ. 193 उक्तिः 17
5. घाघभड्डुरी पृ. 193 उक्तिः 18
6. घाघभड्डुरी पृ. 194 उक्तिः 19
7. घाघभड्डुरी पृ. 194 उक्तिः 20
8. घाघभड्डुरी पृ. 100 उक्तिः 204
9. घाघभड्डुरी पृ. 151 उक्तिः 75
10. घाघभड्डुरी पृ. 170 उक्तिः 136
11. घाघभड्डुरी पृ. 173 उक्तिः 147
12. घाघभड्डुरी पृ. 183 उक्तिः 181
13. घाघभड्डुरी पृ. 177 उक्तिः 163
14. घाघभड्डुरी पृ. 171 उक्तिः 139
15. घाघभड्डुरी पृ. 171 उक्तिः 141